# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम्–७ | गुणाः – ७० |
|---|---|---|
| विषयः – फलितज्योतिषम् | (C.E.- 2.3.3. New ) | समयः ८:०० तः ११:०० |
| दिनाङ्कः – १६/१०/२०१९ | सन्दर्भग्रन्थः – भारतीयकुण्डलीविज्ञानम् | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) लङ्कोदया विघटिका गजभानि गोङ्क-
दस्रास्त्रिपक्षदहना क्रमगोत्क्रमस्थाः
हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थै-
र्मेषादितो घटत उत्क्रमतस्त्विमेस्युः ॥

(ख) गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता ।
लब्धमंशादिना शोध्यं योज्यं स्पष्टो भवेद्ग्रहः ॥

(ग) ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते ।
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम् ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि सोदाहरणं निबन्धं लिखतु । १०**

(क) भयातभभोगानयनम् ।

(ख) लग्नानयनम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) ग्रहं होरा च द्रेष्काणो नवांशो द्वादशांशकः ।
त्रिशांशश्चेति षड्वर्गास्ते सौम्यग्रहजाः शुभाः ॥

(ख) कृष्णपक्षे दिवाजातः शुक्लपक्षे यदा निशि ।
विंशोत्तरी दशा प्रोक्ताऽन्यत्राप्यष्टोत्तरी मता ॥

(ग) दशादशाहता कार्या दशभिर्भागमाहरेत् ।
यल्लब्धं सो भवेन्मासस्त्रिंशन्निघ्नं दिनं भवेत् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि सोदाहरणपूर्वकं निबन्धं लिखतु । १०**

(क) अन्तर्दशासाधनम् ।

(ख) होराचक्रविचारः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) चन्द्रराश्याधिपो यत्र तत्त्रिकोणमथापि वा ।
तत्सप्तमे त्रिकोणे वा संशये लग्ननिर्णयः ॥

(ख) शिवोघ्नोऽब्दः स्वखाद्रीन्दुलवाख्यः खाग्निशेषितः ।
जन्मतिथ्यान्वितस्तत्र तिथावब्दप्रवेशनम् ॥

(ग) द्विघ्नेष्टनाड्यः पंचाप्ता भं शेषञ्च पलीकृतम् ।
दशाप्तमंशास्ते युक्ता रवौ होरादयो भवेत् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(क) प्राणपदसाधनम् ।

(ख) ग्रहाणां बाल्याद्यवस्था ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) षण्ऋतूणां नामानि लिखत ।

(२) करणानां नामानि लिखत ।

(३) नक्षत्राणां नामानि क्रमेण लिखत ।

(४) इष्टकालः कः ?

(५) भभोगः कः ?

(६) किन्नाम भयातः ।

(७) चन्द्रस्य विंशोत्तरी महादशामानं लिखत ।

(८) चरराशिनां नामानि लिखत ।

(९) नवमांशः कः ?

(१०) सायनग्रहः अर्थात् किम् ?

(११) चालनस्य परिचयो देयः ।

(१२) मिथुनराशेः लङ्कोदयमानं लिखत ।

(१३) किं नाम पलभा ?

(१४) चरखण्डः अर्थात् कः ?

(१५) स्वोदयमानम् अर्थात् किम् ?

----oooo----